# शृङ्गाररसविमर्शः

**उत्तमप्रसादः खतिवडाः**
*सहप्राध्यापकः, विश्वविद्यालयविद्यापीठम्*
up.sharma977@gmail.com

**शोधसारः**

*संस्कृतकाव्यशास्त्रे रससिद्धान्तः प्राचीनत्वेन व्यापकत्वेन चेतरान् सर्वानतिशेते । तत्सिद्धान्तानुसारं सर्वमान्यतया नव रसा निर्णीताः । यद्यपि रससंख्यासम्बन्धे आचार्याणामनेके विचाराः प्राकट्यं यातास्तथाप्यद्यावधि नव रसा एव सिद्धान्तपथे संस्थिताः । तत्र शृङ्गाररसस्य सर्वव्यापकत्वं ज्येष्ठत्वमपि सर्वैः स्वीकृतमस्ति । कैश्चित्तु शृङ्गारस्यैव रसत्वमन्येषां तदुपजीवित्वमपि प्रतिपादितम् । विषयेऽस्मिन् विदुषां विचारो नैव विरमति । यथोत्तरं चिन्तनधारा प्रवहमाना विलोक्यते । परन्त्वेतत्सत्यमस्ति यत्- शृङ्गारादृते सर्वजीवनिवहनिगूढं सर्ववाङ्मयव्यापकञ्च रसान्तरं नैवोपलभ्यते । रससिद्धान्तप्रतिपादकाद्भरतादिदानीं यावद्यावन्तोपि आचार्याः समजायन्त । तेषां सर्वेषां शृङ्गाररसे निर्विकल्पा धारणा विशेषानुरागश्च दृश्यते । "यत्किञ्चिल्लोके शुचि मेध्यं दर्शनीयं वा तच्छृङ्गारेणानुमीयते" इत्युक्त्वा भरतेन शृङ्गारस्य सर्वोत्कृष्टत्वमङ्गीकृतम् । भोजराजेन त्वहङ्कारापरपर्यायेनैव शृङ्गारो गृहीतः । "शृङ्गारमेव रसनाद्रसमामनामः" इति समुद्घोष्य शृङ्गारातिरिक्तरसानां प्रकारान्तरेणोपरसत्वमभिव्यक्तम् । रसेऽस्मिन् प्रायः सर्वभावानां सर्वेषां व्यभिचारिभावानाञ्च सम्बन्धः प्रत्यक्षेण परम्परया वा घटत इति रसराजत्वं रसपतित्वं वास्य कल्प्यते इति आचार्याणां मौनस्वीकृतिरनुभूयते । समस्तवाङ्मयेष्वयमेव रसो निःशङ्कं नरिनर्तीति रसेषु शृङ्गारस्य प्राधान्यं व्यापकत्वञ्चेति कल्पनं नैवानुचितमित्यादयो विषया आलेखेऽस्मिन् विवेचिताः सन्ति ।*

**प्रमुखाः शब्दाः**

नाभिजन्मा, प्रमाता, मधुवर्षिणी, मन्मथः, मुक्तकण्ठः,

## १. विषयपरिचयः

संस्कृतवाङ्मये रसशब्दोऽतीव प्राचीनो महत्त्वपूर्णश्च वेविद्यते । वैदिकसाहित्ये विशेषतः परमात्मरूपार्थे प्रयुक्तोऽपि रसशब्दो लौकिकसाहित्ये शृङ्गाराद्यर्थं न व्यभिचरति । शब्दकोषानुसारं शब्दोऽयं नानार्थकः । वैदिककालादद्यावधि गन्धरसस्वादतिक्तविषरागवीर्यदेहधातुजलपारदशृङ्गाराद्यर्थेषु सम्बद्धो दृश्यते । वैदिकवाङ्मये काव्यरसस्यार्थे स्पष्टतया रसशब्दो यद्यपि नैवानुभूयते तथापि वाण्याः पानविषयत्वं क्वचिद्वर्णितं चेत् क्वचित् मधुवर्षिणी वाणी व्याख्याता । अतः काव्यसम्बद्धरसवर्णनपरिपाट्यपि वेदमूलैवेत्यत्र न कोऽपि सन्देहः (नगेन्द्रः, सन् १९६४, पृ. ६) । सर्वप्रथमं

साहित्यशास्त्रीयरसरूपार्थे रसशब्दस्य प्रयोगो वात्स्यायनस्य कामसूत्रे प्राप्यते। "रसो रतिः प्रीतिः भावः" (वात्स्यायनः, १९७०, पृ. ५३) इति। यद्यपि वाल्मीकीयरामायणस्य बालकाण्डे शृङ्गारादिरसानां समुल्लेखः प्राप्यते, तथापि तदंशस्य प्रक्षिप्तत्वं स्वीकुर्वन्ति विद्वांसः। यतो हि प्रामाणिकसंस्करणेषु अंशोऽयं नैवावलोक्यते। महाभारतेऽपि शृङ्गारादिरसतया रसशब्दो नैवायातः । अतः कामसूत्रमेव स्पष्टतया रसशब्दात् शृङ्गारादि-रसबोधकमादिमं स्रोतः । भरतनाट्यसूत्रात्पूर्वमेव कामसूत्रस्य निर्मितिर्निर्धार्यते । वात्स्यायनविरचितस्य कामसूत्रस्य जयमङ्गलाटीकायां रसशब्दात् शृङ्गारादिरसाः भावशब्दाच्च स्थायिसंचारिसात्त्विकभावाः समभिप्रेता लक्ष्यन्ते (नगेन्द्रः, सन् १९६४, पृ.८) । भरतसूत्रं तु रसबोधनाय जगति रसप्रचारायैव प्रवृत्तमिति किं वचः प्रपञ्चनीयम् । एतावता सूत्रकालस्य पूर्वार्धे कामसूत्रादीनां प्रणयनं तथोत्तरार्धे च नाट्यसूत्रादीनां निर्माणमिति कल्प्यते । मुनिना भरतेन नाट्यशास्त्रे केवलं साहित्यशास्त्रसम्बद्धस्यैव रसस्य चर्चा प्रस्तुता। स च रसः विभावानुभावव्यभिचारिभिर्निष्पद्यत इति ससूत्रमुपन्यस्तम् - "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति । भरतात्समारब्धा रसचिन्तनपरम्परा क्रमशो भट्टलोल्लटाद्यभिनवगुप्तान्तैराचार्यैस्तत्सूत्रव्याख्यानरसण्या विस्तारिता । तदनु च मम्मटविश्वनाथादिभिः पूर्वाचार्याणामभिप्रायगर्भिता रसचिन्तनधारा एव संगृहीता। तैर्वैयक्तिकं विशिष्टं चिन्तनं चाभिव्यक्तम्। "व्यक्तः स तैर्विभावाद्यैस्थायिभावो रसः स्मृतः" (मम्मटः, २००७, पृ. ६५) इति रसाभिव्यक्तिं मम्मटो न्यदर्शयत्। एवं विश्वनाथेनापि "विभावेनानुभावेन व्यक्तः०" (विश्वनाथः, २०५८, पृ. ८३) इत्यनया रीत्या रसः परिभाषितः । रसास्वादनसन्दर्भे विश्वनाथस्य मतं मतान्तराद्भिन्नं विचारणीयं च विद्यते । तन्मतानुसारं रसः सप्तविधविशेषणविशिष्टो विद्यते । तत्र प्रथममखण्डविशेषणं प्रयुक्तम् । अखण्डत्वं नाम सजातीयविजातीयस्वगतभेदरहितत्त्वम् । विभावादिसमूहालम्बनात्मकत्वादेक एव इत्यर्थः। अर्थात् भेदाभावाद् रसोऽखण्डरूपो विद्यते। एवमेव स्वप्रकाशत्वम्, आनन्दमयत्वम्, चिन्मयत्वम्, वेद्यान्तरस्पर्शशून्यत्वम्, ब्रह्मास्वादसहोदरत्वम्, लोकोत्तरचमत्कारप्राणत्वं च रसे स्वीकृतम्। घटप्रकाशाय यथा घटज्ञानस्यापेक्षा जायते, घटज्ञानं विना न कथञ्चिदपि घटः प्रकाशते परन्त्वत्र तथा नास्ति । रसप्रकाशाय ज्ञानान्तरं नैवापेक्ष्यते । रसः स्वयं प्रकाशते । अतः रसः स्वप्रकाशरूपः । तथैव रसः सुखस्वरूपः, ज्ञानस्वरूपः, ज्ञेयान्तरसम्पर्करहितश्च विद्यते । रसो ब्रह्मतत्त्वसाक्षात्कारसदृशोऽप्यस्ति । अत एव ब्रह्मास्वादसहोदर इत्युक्तम्। अत्र हि ब्रह्मसाक्षात्कारे ब्रह्ममात्रं प्रकाशते रसास्वादे तु विभावादिकमिति रसस्य सहोदरत्वं युज्यते। पुनश्चायं रसोऽलौकिकाश्चर्यजीवनरूपो व्याख्यातः। एतादृशो रसश्च कैश्चिदेव प्रमातृभिः स्वाभिन्नत्वेनानुभूयते आस्वाद्यते वा। घटादिज्ञाने ज्ञातृज्ञानज्ञेयरूपं वर्गत्रयं भासते चेद् रसास्वादने रसज्ञाने वा अभिन्नरूपेण बोधात् पृथक्तया न किमपि भासते। अतः रससाक्षात्कारोऽपि ब्रह्मतत्त्वसाक्षात्कारसदृश इति प्रतिपादितः । एतेन आनन्दचमत्कारमयत्वे सति विभावादिसमूहावलम्बनज्ञानत्वं रसत्वमिति रसलक्षणं फलितम् (कृष्णमोहन, २०७०, पृ. ७१) । एतादृशो रसः काव्यनाटकादिसम्बद्धो विद्यते। रससिद्धान्तः अलङ्कारशास्त्रस्य प्राचीनो व्यापकश्च सिद्धान्तोऽस्ति। अध्ययनेऽस्मिन् रससंख्याचिन्तनपुरःसरं शृङ्गाररसस्य सपरिकरं चिन्तनं प्रस्तूयते।

## २.अध्ययनस्य प्रमुखाः समस्याः

बहुभिश्चिन्तकैः शृङ्गाररसश्चिन्तितस्तदाधृत्य नैकविधा आलेखाश्च प्रणीतास्तथापि संप्रत्यध्ययनक्रमे एतदालेखसम्बद्धा एताः समस्याः समायान्ति।

(क) रसाः कति सन्ति ?

(ख) शृङ्गाररररसस्य स्वरूपं कीदृशम् ?

(ग) काव्यसाहित्ये शृङ्गाररसस्य स्थानं किम् ? इति।

## ३. अध्ययनस्योद्देश्यम्

शृङ्गाररससंबद्धेषु बहुषु ग्रन्थेष्वालेखेषु च विद्वद्भिर्विहितेष्वपि संक्षेपेण तद्बोधाय लेखसन्दर्भो नैवादृश्यतेत्यध्यनस्यास्य सूत्ररूपेणेमान्युद्देश्यानि भवन्ति। यथा-

(क) रससंख्याविवेचनम्।

(ख) शृङ्गाररसस्य स्वरूपचिन्तनम्।

(ग) काव्यसाहित्ये शृङ्गाररसस्य स्थानावलोकनम् । इति।

## ४.अध्ययनविधिः

अध्ययनस्यास्य सौविध्याय मुख्यसामग्रीसंकलनाय च विशेषरूपेण पुस्तकालयीयाध्ययनविधिरेवात्रांगीकृतो विद्यते । यथावश्यकं व्याख्या- विश्लेषणादिविधयस्तथा क्वचित् तुलना-चिन्तन-मननादिविधयश्चावलम्बिता सन्ति । विशेषतया लेखस्यास्य निष्पादनाय एपिएपद्धतिरङ्गीकृता विद्यते ।

## ५.अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च

आलेखस्यास्य मुख्यं क्षेत्रं साहित्यसिद्धान्तान्तर्गतं रसप्रकरणमेवास्ति । श्रृङ्गाररससंबन्धे के के सिद्धान्ताः स्थापिताः,आचार्यैश्चर्चिताः प्रतिपादिताश्चेत्यादयो विषयाः प्रकृते क्षेत्रान्तर्गताः सन्ति चेत् तदतिरिक्ता विषयाः सीमारूपाः सन्ति। अध्ययनमिदं स्वक्षेत्रे प्रवर्तते तदतिरिक्तविषयेषु नैव प्रवर्तते।

## ६. रससङ्ख्याविवेचनम्

रसशब्दात् साहित्यशास्त्रीयशृङ्गारादिरसबोधनपरम्परा वात्स्यायनीयकामसूत्रात्समारब्धा (नगेन्द्रः, सन्१९६४, पृ.८) दृश्यते। तत्रापि रसशब्दात् शृङ्गारादयः भावशब्दाच्च स्थायिसञ्चारिसात्त्विकादयः सङ्केतिताः सन्ति। परन्तु तेषां संख्यादिकं स्वरूपादिकं च नैवाभिव्यक्तम् । रसस्य सोहापोहं स्वरूपबोधकं प्रतिष्ठापकं चाद्यं शास्त्रं भरतनाट्यसूत्रमेव। भरतेन स्पष्टतया स्वकीये नाट्यशास्त्रे अष्टरसा एव स्वीकृताः प्राप्यन्ते।भरतमुनेः पूर्वमेव द्रुहिणेन अष्ट रसाः स्वीकृताः इति भरतोक्तेरेवावगम्यते। (भरतमुनि, सन् १९४३, पृ. ९१) भरतेन च तेषामष्टानां रसानामेवोल्लेखः

स्वकीये नाट्यशास्त्रे विहितः । सर्वप्रथमम् अष्टरसातिरिक्तरसरूपेण शान्तरसस्य चर्चा आचार्योद्भटेनैव समुद्भाविता । भरतमतानुसारं तु शृङ्गार-रौद्र-वीर-बीभत्सानामेव वस्तुतः रसत्वमासीत्, अन्येषां हास्य-करुण-अद्भुत-भयानकानां तु गौणत्वमेव परिकल्पितमभिलक्ष्यते । तन्मते शृङ्गाराद्धास्यस्य रौद्रात्करुणस्य, वीरादद्भुतस्य, तथा बीभत्साच्च भयानकस्य समुत्पत्तिः दृश्यते । (ना.शा. ६/४०) मूलतश्चत्वारो रसाः, गौणतश्च तावन्त एव रसाः इति रसं विभजता भरतेन एतदतिरिक्ता रसा नैव संकेतिताः । यद्यपि अभिनवगुप्तेन नाट्यशास्त्रे शान्तरसः सूक्ष्मतया चर्चित इति दुराग्रहो दर्शितस्तथापि तस्य खण्डनं सप्रमाणं स्थिरीकृतमिति स्वीकुर्वन्ति विद्वांसः । अतः अष्टरसा एव भरतसम्मता बभूवुः । यदा आचार्योद्भटेन रसगणनाक्रमे शान्तरसः परिगणितः युक्तिबलात् प्रतिपादितश्च तदा पौरस्त्यरसचिन्तनजगति एको नूतनस्तरङ्गः समुत्पन्नः । ततो धनञ्जयादिभिः शान्तरसोंऽशतः स्वीकृतः । शान्तरसस्याभिनयासम्भवात् नाटकातिरिक्तसाहित्ये तस्य सद्भावसत्त्वेऽपि नाट्ये तन्न संगच्छते इति तेषामभिप्रायः आसीत् । परन्तु आनन्दवर्धन-अभिनवगुप्तादिभिः पुनस्तन्मतं खण्डितम्, तथा समग्रसाहित्ये शान्तरसस्य समाना स्थितिश्च प्रतिपादिता । अभिनवगुप्तमते तु शान्त एव प्रमुखो रसः । अन्ये शृङ्गारादयो रसास्तु तस्यैव अङ्गभूताः सन्ति । अतः शान्तस्याङ्गित्वम्, अन्येषां चाङ्गत्वम् इति तदभिप्रायः । अनेन सर्वरसाधारत्वेन युक्तिपूर्वकं शान्तरसः प्रतिष्ठापितो विद्यते । एवं चानेन रसान्तरसम्बद्धानि पूर्वप्रचारितानि कानिचन मतानि च खण्डतानि सन्ति । तत्र च आर्द्रतास्थायिभावकः स्नेहरसः, गर्धस्थायिभावकः लौल्यरसः, भगवद्भक्तिस्थायिभावकः भक्तिरसश्चानेन चूर्णितः । पुनश्च स्नेहरसस्य रतिस्थायिभावे अथवा उत्साहेऽन्तर्भावः । लौल्यरसस्य हासे रतिस्थायिभावे वान्तर्भावस्तथा भक्तिरस्य च रतिस्थायिभावे भावान्तरे वान्तर्भावः सम्भावितः परन्तु एतेषां स्वतन्त्रास्तित्वं नाङ्गीकृतम् । तथा च मृगया-अक्ष-द्यूतादीनां रसानां च अस्तित्वं नैवोरीकृतं तेन । एवं च शान्तरसस्य समुद्भावकादुद्भटात् परवर्तिना रुद्रटेन पुनः स्नेहस्य साहचर्यस्य वा स्थायिभावत्वं प्रकल्प्य प्रेयो-नामकः दशमो रसश्चर्चितः तथा सर्वेषां निर्वेदादिसञ्चारिभावानां रसत्वं सम्भावितम् । तन्मतानुसारं सर्वेऽपि सञ्चारिभावाः रसत्वमधिगन्तुमर्हन्ति । (काव्यालङ्कारः, १२/४) अनेन रससंख्यायाः विस्तारे कोऽपि नवीनः सङ्केतो विहितः । ततश्च परवर्तिभिराचार्यैः रुद्रटस्याशयं स्वीकृत्य रससंख्यायाः विस्तारे संलग्नैरवाभि । तेषु भोजराजोऽन्यतमत्वमभजत । तेन च स्वकीये शृङ्गारप्रकाशे सर्वे स्थायिभावाः सञ्चारिभावाः सात्त्विकभावाश्च रसरूपत्वं प्राप्नुवन्तीति व्याख्यातम् । तदनुसारमेकोनपञ्चाशत् (४९) संख्यका भावाः रसरूपेण संभाविता बभूवुः । एवं च अनेनैवाचार्येण प्रेयः-शान्त-उदात्त-उद्धतरसाश्च क्रमशः धीरललित-धीरप्रशान्त-धीरोदात्त-धीरोद्धत-नायकसम्बद्धाः सन्तीति प्रतिपादिताः । पुनश्च स्वातन्त्र्य-आनन्द-प्रशम-पारवश्यादिभिः सह साध्वस-विलास-अनुराग-संगमादि-रसानां च चर्चानेनोपस्थापिता । स्वल्पैः शब्दैरुच्यमाने संख्यादृष्ट्यानेकेषां रसानां समुल्लेखो भोजराजेनैव विहितः इति निश्चिन्वन्ति विद्वांसः । तदनन्तरं रामचन्द्रेण तृष्णास्थायिभावको व्यसनरसः, अरतिस्थायिभावकः दुःखरसः, तथा सन्तोषस्थायिभावकः सुखरसश्च चर्चाविषयीकृतः । परन्तु एते च रसाः प्रसिद्धनवरसेष्वन्तर्भवितुं शक्नुवन्तीति च तेनैव सूचितम् । ततः विश्वनाथेन वात्सल्यस्थायिभावको वत्सलाख्यः दशमो रसः संस्थापितः । साहित्यदर्पणे तस्य चर्चा

विस्तरेण प्राप्यते। एवमेव भानुदत्तेन च नवरसातिरिक्ताः वात्सल्य-लौल्य-भक्ति-कार्पण्य-मायादयो रसाः प्रतिपादिताः। एतेषु केचन रसः पूर्वाचार्यैरपि सङ्केतिता आसन्, इत्यपि अनेन समुद्घोषितम्। वस्तुतः स्पृहास्थायिभावकः कार्पण्यरसः मिथ्याज्ञानस्थायिभावकः मायारसश्च अस्यैव स्वोपज्ञकल्पनारूप आसीत्। एवञ्च भक्तिरसामृतसिन्धुग्रन्थस्य रचयित्रा रूपगोस्वामिना पूर्वाचार्यैः प्रतिपादितात् भिन्नो भगवद्भक्तिस्थायिभावकः स्वतन्त्रो भक्तिरसः स्वीकृतः। वैष्णवाचार्येणानेन सर्वरसेषु भक्तिरसस्यैव मुख्यत्वमङ्गिरसत्वं वा व्याख्यातमवधारितञ्च। तदनन्तरं भक्तिरसपरिपोषकाः बहवो वैष्णवाचार्याः बभूवुः। यैर्भक्तिरसः प्रचारितः प्रसारितः सर्वरसचूडामणित्वेन प्रतिष्ठापितश्च। तात्कालिके साहित्ये यस्य महान् प्रभावो दरीदृश्यते। फलतः बहूनि भक्तिकाव्यानि तदा भगवद्भक्तिपरायणैः कविभिररच्यन्त। भक्तितत्त्वं व्याचिख्यासुभिर्भक्तिरसं प्रसारयद्भिश्च मधुसूदनादिभिरन्यैराचार्यैश्च भक्तिरसायनभक्तिसूत्रादीनि बहूनि काव्यात्मकानि ग्रन्थरत्नानि निरमीयन्त। तदानीन्तने समग्रसाहित्ये भक्तिरसस्य प्रबलं प्रभावं तथा सुविपुलां पृष्ठभूमिं च दृष्ट्वा पण्डितराजो जगन्नाथोऽपि भक्तिरसे मुमोह। (जगन्नाथ, सन् १९८८, पृ. १६६) अत एव भगवदनुरागरूपां भक्तिं शिरसोरसा च स्वीचकार। तेन रसगङ्गाधराख्ये स्वीये ग्रन्थरत्ने यथाशक्ति भक्तिः पुरस्कृता समहन्महत्त्वं संस्थापिता च। प्रथमं तु भक्तिरसस्य स्वातन्त्र्यं प्रामुख्यं चाङ्गीकृतम्। परमन्ततः भरताभिनवमम्मटादिभिः पूर्वाचार्यैः समालिङ्गितां नवरसपरम्परामेव हृदा मौनमनुमोदमानो भक्तिरसं भावसागरं गाहयाञ्चकार। ततः परं पूर्वीयकाव्यसाहित्ये नव्यसभ्यता समारब्धा। पुनः रससिद्धान्तस्य आधुनिकाः समीक्षकाश्चाहंपूर्विकया उदयं प्रापुः। ते च रसस्य विषये रससंख्यायाः विषये च नवीनं चिन्तनं प्राकटयन्। तत्र च राघवनेन लज्जास्थायिभावकः व्रीडानको रसोऽङ्गीकृतश्चेत् भरतेन्दुहरिश्चन्द्रेण भक्तिवात्सल्यादयो रसाः समर्थितास्तथा तदतिरिक्ताः सख्यप्रमोदादयश्चोरीकृताः। एवमेव रामचन्द्रशुक्लेन प्रकृतिरसः परिपोषितश्चेत् गुलावरायशिवरामादिभिः देशभक्तिरसः समुद्भावितोऽस्ति। एवमेव आधुनिकैः कैश्चित् विद्वद्भिः क्रान्तिरसः अन्यैः उद्वेगरसः इतरैः प्रक्षोभरसश्च क्वचित् परिचर्चितः समुपलभ्यते। (नगेन्द्र, सन् १९६९) सम्प्रति रसचिन्तनचतुरैर्विद्वद्भिश्च प्राचीनानामाचार्याणामर्वाचीनानां विदुषां च रससंबद्धाशयमात्मसात्कृत्य रससम्बन्धिनी समसामयिकी धारणा वितन्यते। आधुनिकचिन्तकेषु केचन नवरसानामेव समर्थकाः सन्ति चेत् केचित् तदतिरिक्तानां प्रेयप्रक्षोभवत्सलादिरसानां स्वतन्त्रास्तित्वमङ्गीकुर्वाणाः दृश्यन्ते। (चौधरी, सन् १९९०, पृ. २८८) अनया रीत्या रससंख्यायामनेकत्वमनुभूयते।

## ७. शृङ्गाररसस्वरूपम्

साहित्यशास्त्रे सर्वजनसम्मतेषु नवरसेषु मध्ये शृङ्गाररसो ज्येष्ठत्वेन प्रेष्ठत्वेन च गृह्यते। रसोऽयं सर्वैः साहित्यिकैः समानतया स्वीक्रियते। केषुचिद्रसेषु रसास्तित्वस्य रसान्तरेष्वन्तर्भावत्वस्य वा विवादो दृश्यते। परन्तु रसेऽस्मिन् न कोऽपि विवादः। आधिकारिकरूपेण रससिद्धान्तस्य स्थापनकालादेव शृङ्गाररसः प्रथमस्थानापन्नत्वेन वर्णितः। अत एव महामुनिना भरतेनापि सबहुमानं रसोऽयं परिभाषितः- "यत्किञ्चिल्लोके शुचिमेध्यमुज्ज्वलं दर्शनीयं वा तच्छृङ्गारेणोपमीयते" (भरतमुनि, सन् १९४३, पृ. २५२)। एवञ्च-"यथा गोत्रकुलाचारोत्पन्न....शृङ्गारो रसः"

(उपाध्याय, सन् १९५२, पृ. ७७) इति। लोके यथा तत्तद्गोत्रकुलाचारोत्पन्नानां जनानां तदनुकूलमेव नामधेयं जायते, तथैव नाट्याश्रितानां रसानामपि नामधेयं तेनैव रीत्या भावादिना निश्चीयते । अतः सहृदहृदयहारित्वादुज्ज्वलवेषात्मकत्वाच्च रसोऽयं शृङ्गाररसनाम्ना व्यवह्रियते। आचार्यविश्वनाथेनापि तेनैव रूपेण परिभाषितं यत्-"शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः। उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते" (विश्वनाथः, २०५८, पृ. १८५) इति । तथाहि शृणाति चरमदशाप्रापणेन हिनस्ति कामुकानिति शृङ्गम्, तदेव मन्मथोद्भेदः । शृ हिंसायामित्यस्माद्धातोरुणादिसूत्रात् निष्पन्नं रूपमस्ति शृङ्गम् । शृङ्गशब्दस्य प्रसङ्गेऽस्मिन् उत्कर्षाद्यर्थलाभेऽपि योगजशक्त्या मरणावधिको मान्मथो व्यापार इति गम्यते । शृङ्गमृच्छति स्वकारणत्वेन प्राप्नोतीति व्युत्पत्त्या शृङ्गारशब्दो निष्पद्यते । वीतरागाणां रसानुत्पत्तेः शृङ्गस्यागमनं प्राप्तिरेव हेतुर्यस्य इत्यनया रीत्या शृङ्गार इति सिद्ध्यति । रसोऽयं प्रायेणोत्तमप्रकृतिकः स्वीकृतः । एतत्प्रकृतिभिन्नेऽपि क्वचित् शृङ्गारस्तु सिद्ध्येत् परं स शृङ्गाराभासः स्यादतः प्रकृतरसः प्रकृतिभूतयोः स्त्रीपुंसोः परस्परं प्रौढतरानुरागहेतुकत्वमत्र द्योतितम् । एतादृशः शृङ्गाररसः सहृदयैरनुभूयत एव। रसानां वर्णं दैवतञ्च पृथक् पृथङ्निर्दिष्टमस्ति। तदनुसारं शृङ्गाररसस्य देवता भगवान् विष्णुर्विद्यते । नाट्यशास्त्रकारेण भरतेनापि स्वकीयग्रन्थे समुल्लिखितं यत्-"शृङ्गारो विष्णुदेवस्तु" (भरतमुनि, सन् १९४३, पृ. २४०) इति। साहित्यदर्पणकारो विश्वनाथोऽपि तत्रैव सम्मतिं प्रकटयति। उक्तञ्च तेन-"स्थायिभावो रतिः श्यामवर्णोऽयं विष्णुदैवतः" (विश्वनाथः, २०५८, पृ. १९०) इति। यस्य रसस्य यो गुणो यादृशः स्वभावस्तादृशमेव लक्षणम्, तदनुरूपमेव तस्य देवतादिकं वर्णितं प्राप्यते। शृङ्गाररसस्य दैवतं विष्णुः, वर्णश्च श्याम उक्तः। भगवान् विष्णुः सत्त्वगुणसम्पन्नो देवः। स च स्रष्टुरपि स्रष्टा। यतो हि जगत्स्रष्टृत्वेन ब्रह्मणो ग्रहणं जायते। सोऽपि विष्णोर्नाभिकमलात् समुत्पद्यते। अतो नाभिजन्मेति नामधेयं तस्य प्रसिद्धम्। अनेन चिन्तनेन शृङ्गाररसः काव्यसृष्टेरादिकारणं व्यज्यते। सत्त्वगुणविशिष्टस्यापि विष्णोर्वर्णः श्यामः स्वीकृतः । यथा-मेघवर्णं शुभाङ्गम् ।"नूतनजलधररूचये.." (भट्टाचार्य, २०१०, पृ. १) इत्यादिबहुभिः स्तुतिपद्यैरपि तद्ज्ञायते । एवमेव शृङ्गारस्यापि देवता विष्णुश्चेद्वर्णः श्याम उक्तः । श्यामवर्णस्य सम्बन्धः सर्वदैव विष्णुना सह विद्यत इति तारतम्यं सङ्गच्छते । अतः शृङ्गाररसः श्यामवर्णक इति भगवता विष्णुना सह सामीप्यं भजते। प्रकारान्तरेण मन्मथस्योद्रेकः प्राचुर्येण शृङ्गारे दृश्यते। मन्मथश्च विष्णोरवतारस्य कृष्णस्य पुत्रो विद्यते। कृष्णस्योद्वाहिता पत्नी आसीत्। तस्या गर्भाच्च प्रद्युम्नस्य जन्माभूत्। स एव कामदेवस्यापररूपो विद्यते । अमरकोशेऽपि-"प्रद्युम्नो मीनकेतनः" इति कामनामगणनाप्रसङ्गे तन्निरूपितम् । अतः शृङ्गाररसस्य दैवतं विष्णुः, वर्णश्च श्याम इति कथने मिथः सम्बन्धो विद्यत एव। एवञ्च शृङ्गाररसस्य स्थायिभावो रतिर्विद्यते। कामस्य पत्नी च रतिरेवेति शृङ्गारेण सह कामस्यापरोऽपि सम्बन्धः सङ्घटते। रतिशब्दस्य सामान्यार्थो भवति प्रीतिः। प्रीतिश्च न केवलं मानवमात्रस्यापितु जीवनिवहस्यैव साररूपा। प्रीतिं विना न कोऽपि कुत्रापि क्षणमपि स्थातुं क्षमते। रतिविषये विद्वद्भिरालङ्कारिकैराचार्यैश्च नैजं नैजं चिन्तनं प्रकटितमस्ति । तत्र प्रदीपकारो रतिमभिलक्ष्य ब्रूते-"रतिस्तु मनोनुकूलेष्वर्थेषु सुखसंवेदनमिति" एतन्मतानुसारं स्वानुकूलवस्तुषु सुखानुभूतिरेव रतिः । एवमेव सुधासागरकारोपि रतिमेव संलक्ष्याभिधत्ते-"स्मरकरं वितान्तकरणयोःस्त्रीपुंसोः परस्परं रिरंसा रतिरिति" एतत्कथनानुसारं स्त्रीपुंरूपयोर्मिथो रमणेच्छा एव रतिरिति ज्ञायते । साहित्यदर्पणकारेणापि रतिविषये स्वाभीमतं प्रकटितं प्राप्यते । उक्तञ्च तेन-

"रतिर्मनोनुकूलेऽर्थे मनसः प्रवणायितम्" (विश्वनाथः, २०५८, पृ. २२८) । अर्थात् मनसोऽनुकूले प्रिये वस्तुनि प्रवणायितमुत्कटमावेगो यज्जायते तस्यैव नामधेयं रतिरिति । सङ्क्षेपेणोच्यमाने प्रेमार्द्रं मन एव रतिरित्यर्थः । एतादृशी रतिफ शृङ्गाररसस्य स्थायिभावरूपा विद्यते । इयमेव रतिर्यदि देवादिसम्बन्धिनी जायते तदा भक्तिरूपा निष्पद्यते । अतो रतिर्नैकरूपा, सर्वव्यापिनी च विद्यते । भक्तिवादिभिराचार्यैः प्रीतिरूपा रतिरनिर्वचनीयेति व्याख्याता । ते वदन्ति च प्रेमस्वरूपमनिर्वचनीयं मुकास्वादनवत् । अतः शृङ्गाररसस्य स्थायिभावरूपा रतिः सर्वव्यापिनीति शृङ्गाररसस्यापि सर्वव्यापकत्वं दुर्निवारम् । शृङ्गारोऽयं रसो देहमण्डनादिनापि सम्बध्यते । यतो हि मण्डनस्यापरपर्यायरूपेण लोके शृङ्गारशब्दः प्रयुज्यते । लोके प्रमदादिभिः सौन्दर्यवर्धनाय कज्जलपाण्डुरजोलिम्पनकेशप्रशाधनादिकं यद्विधीयते तदेव मण्डनम् । तच्च शृङ्गारशब्देन व्यवह्रियत इति शृङ्गाररसस्य मण्डनादिना सह प्रगाढः सम्बन्धोऽनुभूयते । तथ्येनानेन एतदपि स्फुटीभवति यत् शृङ्गाररसः कलासम्बद्धः केलिसम्बद्धश्च विद्यते । कलादिकन्तु जीवनस्याङ्गरूपमिति शृङ्गाररसः यया कयापि रीत्या अस्माभिः सह सम्बध्यते ।

## ८. साहित्ये शृङ्गाररसस्य स्थानम्

समग्रसाहित्ये सर्वरसचूडामणित्वेन शृङ्गाररसो राराज्यते । कतिपयैराचार्यैस्तु रसराजत्वेनापि शृङ्गाररसः परिगृहीतः प्राप्यते । यद्यपि शब्दतः शृङ्गाररसस्य रसराजत्वं नैवोक्तं तथापि प्रकारान्तरेण रसपतित्वेन व्यवहृतं दृश्यते । रसान्तरापेक्षया रसेऽस्मिन् सर्वेषामाचार्याणामसाधारणी प्रीतिर्वेविद्यत एव । सर्वरसेषु शृङ्गारस्य सर्वोत्कृष्टन्तु रससिद्धान्तस्थापनस्यादिकालादेवाङ्गीकृतमनुभूयते । किं बहुना रससिद्धान्तस्य संस्थापकाचार्येण भरतेनैव रसोऽयमुत्कृष्टत्वेन परिभाषितः । उक्तञ्च-"यत्किञ्चिल्लोके शुचि मेध्यं दर्शनीयं वा तच्छृङ्गारेणानुमीयते" (भरतमुनि, सन् १९४३, पृ. २५२) । अतो जगति यत्किञ्चिदतिशयपवित्रं विशुद्धं समुज्ज्वलन्तथा दर्शनीयं च वस्तु विद्यते, तस्य शृङ्गाररसेन सह तुल्यतामङ्गीक्रियते इति यद्व्याख्यातं तत्कथनेन ज्ञायते शृङ्गाररसः स्वाभाविकेन नैजेन गुणेन सर्वरसानतिशेते । आचार्यरुद्रटेनापि रसोऽयं मुक्तकण्ठेन प्रशंसितः । तन्मतानुसारं शृङ्गाररसे यद्रसनीयत्वमस्ति तद्रसान्तरेषु केषुचिदपि नास्ति । अयञ्च रसः बालादावृद्धमभिव्याप्तं विद्यते । एतावद्येव न पशुपक्षिष्वपि रसस्यास्य सुमहान् प्रभावः परिलक्ष्यते । अतः काव्यबन्धसम्बद्धानां सुकवीनां शृङ्गाररसे विशेषाभिरूचिर्दृश्यते । तदावश्यकञ्च । येन कविना शृङ्गारस्तिरस्क्रियते, तेन काव्यसाहित्ये साफल्यं नैवाधिगम्यते । "स एव वीतरागश्चेद्नीरसं सर्वमेव तत्" इति सूक्तिस्तदेव सङ्केतयति । किं बहुना शृङ्गारहीनं काव्यं विरसमस्पृहणीयञ्च निष्पद्यते । रुद्रटस्यैव कथने "भवति विरसमेवानेन हीनं हि काव्यम्" (रुद्रटः, १९८५, पृ. १३५) इति । राजानकानन्दवर्धनोऽपि शृङ्गाररसं परमाह्लादकं निरतिशयमधुरञ्च मनुते । उक्तञ्च-"शृङ्गार एव मधुरः परप्रह्लादनो रसः" (आनन्दवर्धनः, २०१०, पृ. १२४) इति । आचार्यै रसेषु मध्ये शृङ्गारसस्य रसतमत्वं श्रेष्ठत्वं वा यद्द्योतितं तत्रापरं रहस्यमप्यनुस्यूतं प्राप्यते । वस्तुत एकरससिद्धान्तानुसारं केवलं शृङ्गारस्यैव रसत्वं तेषामभिमतं स्यात् । प्रकारान्तरेण वीरादिरसानां मूलाधारत्वमपि शृङ्गार एव स्वीकृतमित्यभिप्रायः । भोजराजस्तु शृङ्गारातिरिक्ते वीरादौ रसत्वमपि स्वीकर्तुं नाभिलषति । तन्मतानुसारं बहुभिराचार्यैः स्वीकृतेषु शृङ्गार-वीर-करूण-अद्भुत-हास्य-भयानक-वीभत्स-रौद्र-वत्सल-शान्तरसेष्वतिशयरसनात्

शृङ्गार एव रसः । वीरादीनां शृङ्गारेण सह तुल्यत्वं कल्पयितुमपि नैव पार्यते । उक्तञ्च- "शृङ्गारवीरकरुणाद्भुतहास्यरौद्रवीभत्सवत्सलभयानकशान्तनाम्नः, आम्नाशिषुर्दशरसान् सुधियो वयन्तु शृङ्गारमेव रसनाद्रसमामनामः" (भोजराजः, २००७, पृ. ४७०) इति । भोजराजेन रसोऽयं शृङ्गारोऽहङ्कारस्याभिमानस्य वा पर्यायरूपेण स्वीकृतः प्राप्यते । "रसोभिमानोऽहङ्कारः शृङ्गारः इति गीयते" (भोजराजः, २००५, पृ. १६२) इति उक्तिस्तदेव तथ्यं प्रमाणयति । अत्र प्रयुक्तोऽहङ्कारशब्दो मिथ्याभिमानरूप उत्तेजनाजन्यो गर्भरूपश्च नापितु सहजानुरागस्योद्योतको विद्यते । सहजानुरागरूपोऽहङ्कार एव भोजस्य मते रसः । अतो मनोनुकूलदुःखादावपि आत्मवत्सुखाभिमान एव रस इति तस्य रसस्य परिभाषा । उदाहरति च यथा-"दुःखदातापि सुखं जनयति यो यस्य वल्लभो भवति, दयितनखदूयमानयोर्विवर्धते स्तनयोरोमाञ्चः" (भोजराजः, २००७, पृ.४६) इति । भोजराजानुसारं सहजानुरागरूपोऽहङ्कारो न सर्वेषां सुलभः । जन्मजन्मान्तरपुण्यपुञ्जात्केचन पुण्यात्मान एव तं प्राप्नुवन्ति । अयमेव पुरूषाणां परमा सम्पत् । तथा सद्गुणोदयकारणञ्च विद्यते । स एव जनः सहृदय-रसिक-सामाजिकादिपदप्रयोगस्याधिकारी जायते, यस्मिन्नहङ्कारनाम्नी वृत्तिर्जागरिता विद्यते । अहङ्कारस्य शृङ्गारस्य वा यत्रास्तित्वं विद्यते तत्र रसिकत्वं स्वतः समायाति । तद्धीने तु नैराश्यं स्वाभाविकमेव । प्रकारान्तरेणाहङ्कारी शृङ्गारी च समानार्थकः । कविः सामाजिकश्च यदा शृङ्गारी तदाखिलं जगद्रसमयं जायते, नोचेत् सर्वं नीरसं निष्पद्यत (आनन्दवर्धनः, २०१०, पृ. २०४) इति । अतः शृङ्गारस्य व्यापकत्वे सर्वोत्कृष्टत्वे च न कोऽपि विरोधः । आचार्यविश्वनाथेनापि शृङ्गाररसस्य महनीयत्वं व्यापकत्वञ्चाङ्गीकृतम् । तत्र हेतुरपि तेन प्रस्तुतो यत्- शृङ्गारस्तादृशो रसो यत्र सर्वेऽपि सञ्चारिणः सात्त्विकाश्च भावा येन केनापि सम्बन्धेन सम्बन्धिता जायन्ते । रसान्तरैः सह एतावत्सम्बन्धः सञ्चारिभावानां नैवावलोक्यते कुत्रापि । सम्भोगरूपेण विप्रलम्भरूपेण च विभक्तोऽयं शृङ्गाररसोऽखिलं काव्यवाङ्मयमभिव्याप्य विराजते । काव्यनाटकादिसम्बन्धे रसोऽयमङ्गितया एव स्वीकृतोऽस्ति काव्यसिद्धान्तविद्भिः । अतो महाकाव्यलक्षणे नाटकलक्षणे च एक एव भवेदङ्गी शृङ्गारो वीर एव वा (विश्वनाथः, २०५८, पृ. ३९०) इति मुख्यरसत्वं शृङ्गारस्य व्याख्यातम् । लघुकाव्याद्महाकाव्यपर्यन्तं लघुकथातो महाप्रबन्धपर्यन्तं रसोऽयं व्याप्तः प्राप्यते । रसान्तराणामपेक्षया अस्यैव रसस्य प्राधान्यं सर्वत्र काव्यग्रन्थेषु नाट्यग्रन्थेषु कथाप्रबन्धेषु गद्यकाव्येषु च विलोक्यते । आचार्यभोजराजस्यानुसारं रसोऽयमहङ्काररूपो विद्यते । अहङ्कारश्चात्मरूपः । यथात्मनः सर्वव्यापकत्वं तथैव शृङ्गाररसस्यापि व्यापकत्वं दुर्निवारम् । "आत्मनस्तु कामाय सर्वं प्रियं भवति " (बृहदारण्यकोपनिषद्, २०३६, पृ. १०५) इत्यौपनिषदीं भणितिमनुसृत्य शृङ्गारस्य कृते उत्साह-क्रोध-घृणा-विस्मय-भय-निर्वेदादयोऽपि प्रेमास्पदा जायन्ते । एतावता विवेचनेन चिन्तनेन च एतत्तथ्यं सिद्धं यत्- रसोऽयं शृङ्गारो जगति पक्षुपक्षितरुगुल्मादिभ्य आरभ्यामनुष्यं तथाखिलं वाङ्मयञ्चाभिव्याप्य राजते ।

## ९. उपसंहारः

शृङ्गारो रसः सर्वरसश्रेष्ठत्वेन सर्वैः स्वीकृतः । तत्रापि केचनाचार्याः केवलं शृङ्गारमेव रसत्वेन स्वीकर्तुमभिलषन्ति । अन्ये च रसास्तस्यैव शेषभूता इति तेषामभिप्रायो विद्यते । तत्र विशेषतो भोजराजस्य मतं

विचारणीयमस्ति । अनेन च शृङ्गाररसस्य मूलरसत्वमङ्गीकृतम् । एतन्मतानुसारं अहङ्कारोऽभिमानो वा आत्मनः विशेषः गुणः । स च शृङ्गाररसरूपः । तस्यैव जागरणं तृप्तिर्वा काव्यस्य चरमं लक्ष्यं विद्यते । शृङ्गाररसादेव अन्ये सर्वेऽपि भावाः समुत्पद्यन्ते । अतः सर्वेषां मानसिकभावानां मूलमयमेव । अग्नेः यथा विस्फुलिङ्गा जायन्ते तथैव शृङ्गारादपि बहवो भावा उत्पद्यन्ते । यथा च विस्फुलिङ्गा अग्निज्वालायाः परिपोषकाः भवन्ति तथैव अन्ये भावा अपि शृङ्गारस्यैव पोषका जायन्ते । अतः शृङ्गारस्य भावान्तरैः सह पोष्यपोषकभावसम्बन्धः विद्यते । भोजराजस्य अयं सिद्धान्तः अग्निपुराणेनापि समर्थितः । तदनुसारं रसानन्दः ब्रह्मानन्दतुल्यो विद्यते । चैतन्यस्य चमत्कारात् आनन्दाभिव्यक्तिर्जायते । आनन्दाभिव्यक्तौ रसाभिव्यक्तिश्च अहंकारादेव निष्पद्यते । अहंकारात् अभिमानः, अभिमानाच्च रतिरुत्पद्यते । विभावादीनां संयोगाद् रतिश्च शृङ्गारे परिणमते । शृङ्गारस्यैव हास्यादयो भेदाः स्वीकृताः सन्ति । अत्र भोजराजस्य मते शृङ्गाररसः समग्ररसस्य पर्यायरूपो विद्यते चेत् अग्निपुराणानुसारं शृङ्गाररसः रसान्तरोत्पादकः दृश्यते । वस्तुतः उभयोरपि मतयोरभिप्राय एक एव निष्पद्यते । मतमिदं रामचन्द्रगुणचन्द्रादिभिरपि सम्मतमेवावलोक्यते । शृङ्गाररसस्य व्यापकत्वं श्रेष्ठत्वं तु बहुभिरेवाचार्यैरङ्गीकृतं प्राप्यते । तत्र भरतरुद्रटानन्दवर्धनाभिनवविश्वनाथादिभिरपि शृङ्गाररसस्य रसविशेषत्वेन चर्चा विहिता । तेषां मतानुसारं शृङ्गाररसस्य स्थायिभावापन्ना रतिः सर्वजनविषया विद्यते । शृङ्गारे जनानां स्वाभाविकी एव प्रवृत्तिर्बोभवीति । संभोगविप्रलम्भभेदेन विभक्तस्य शृङ्गाररसस्य निष्पत्तौ बहूनां सात्त्विकसञ्चारिभावानामुपस्थितिर्जायते । (द्विवेदी, सन् २००३, पृ. ६८) अतः रसस्यास्य व्यापकत्वे नास्ति कोऽपि विवादः । एवं च नवरसातिरिक्तरसत्वेन कल्पितानां बहूनां रसानामपि शृङ्गाररसे एव अन्तर्भावः स्वीक्रियते । रसेऽस्मिन् बहूनां भावानां संश्लेषणं प्राप्यते । व्यापकत्वं, सर्वजनग्राह्यत्वम्, आह्लादकत्वं, कमनीयत्वं च अस्य रसस्य गुणाः सन्ति । शृङ्गाररसमाधृत्य बहवः साहित्यग्रन्थाः विरचिताः सन्ति । तस्मात् शृङ्गाररसस्य रसराजत्वं संगच्छते परन्तु सर्वरसानां मूलत्वं सम्भवति नवेति विषयः इतोऽपि अनुसन्धानविषयः । विषयोऽयं सर्वेषां साहित्यपथवर्तिनां विदुषां पुरतोऽनुयोगरूपेण विराजते । तत्र धीमतां धीः प्रसरेदिति ।

## कृतज्ञताज्ञापनम्

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च हार्दमुपकारं कृतवद्भ्यः सर्वेभ्यो विशेषज्ञगुरुभ्यः, अन्येभ्यः सहयोगिभ्यश्च हार्दं कातज्ञ्यं व्यनज्मि ।

## सन्दर्भग्रन्थसूची

आनन्दवर्धनः. (सन् २०१०). *ध्वन्यालोकः*. वाराणसीः चौखम्बा सुरभारती प्रकाशन ।

उपाध्यायः, अयोध्यासिंहः. (सन् १९५२) *रसकलशः*. बेहलियासरायः पुस्तकालय ।

द्विवेदी,चन्द्रमौलि. (सन् २००३). *रसवसुमूर्ति*. वाराणसी: समज्ञा प्रकाशन.

नगेन्द्रः. (सन् १९६४). *रससिद्धान्तः* दिल्लीः पब्लिशिङ् हाउस।

बृहदारण्यकोपनिषद्. (२०३६). वाराणसीः महेश अनुसन्धान संस्थान।

भरतमुनिः. (सन् १९४३). *नाट्यशास्त्रम्(केदारनाथः).* मुम्बईः निर्णय सागर प्रेस।

भोजराजः. (२००७). *शृङ्गारप्रकाशः.* मुम्बईः निर्णय सागर प्रेस।

भोजराजः. (२००५). *सरस्वतीकण्ठाभरणम्.* वाराणसीः चौखम्बा संस्कृत संस्थान।

मम्मटः. (२००७). *काव्यप्रकाशः(सत्यव्रतसिंहः सं.).* वाराणसीः चौखम्बा विद्याभवन।

वात्स्यायनः. (सन् १९७०). *कामसूत्रम्.* वाराणसीः चौखम्बा अमरभारती प्रकाशन।

विश्वनाथः. (२०५८). *साहित्यदर्पणः.*वाराणसीः चौखम्बा संस्कृत संस्थान।